# ramApatyashtakam

# રમાપત્યષ્ટકમ્

## Document Information

Text title : ramApatyaShTakam

File name : ramApatyaShTakam.itx

Category : aShTaka, vishhnu, vishnu_misc, brahmAnanda, vishnu

Location : doc_vishhnu

Author : Swami Barhmananda

Proofread by : PSA Easwaran

Latest update : June 13, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# રમાપત્યષ્ટકમ્

શ્રીગણેશાય નમઃ ॥

જગદાદિમનાદિમજં પુરુષં શરદમ્બરતુલ્યતનું વિતનુમ્ ।
ધૃતકઞ્જરથાઙ્ગગદં વિગદં પ્રણમામિ રમાધિપતિં તમહમ્ ॥ ૧॥

કમલાનનકઞ્જરતં વિરતં હૃદિ યોગિજનૈઃ કલિતં લલિતમ્ ।
કુજનૈઃ સુજનૈરલભં સુલભં પ્રણમામિ રમાધિપતિં તમહમ્ ॥ ૨॥

મુનિવૃન્દહૃદિસ્થપદં સુપદં નિખિલાધ્વરભાગભુજં સુભુજમ્ ।
હૃતવાસવમુખ્યમદં વિમદં પ્રણમામિ રમાધિપતિં તમહમ્ ॥ ૩॥

હૃતદાનવદૃપ્તબલં સુબલં સ્વજનાસ્તસમસ્તમલં વિમલમ્ ।
સમપાસ્ત ગજેન્દ્રદરં સુદરં પ્રણમામિ રમાધિપતિં તમહમ્ ॥ ૪॥

પરિકલ્પિતસર્વકલં વિકલં સકલાગમગીતગુણં વિગુણમ્ ।
ભવપાશનિરાકરણં શરણં પ્રણમામિ રમાધિપતિં તમહમ્ ॥ ૫॥

મૃતિજન્મજરાશમનં કમનં શરણાગતભીતિહરં દહરમ્ ।
પરિતુષ્ટરમાહૃદયં સુદયં પ્રણમામિ રમાધિપતિં તમહમ્ ॥ ૬॥

સકલાવનિબિમ્બધરં સ્વધરં પરિપૂરિતસર્વદિશં સુદૃશમ્ ।
ગતશોકમશોકકરં સુકરં પ્રણમામિ રમાધિપતિં તમહમ્ ॥ ૭॥

મથિતાર્ણવરાજરસં સરસં ગ્રથિતાખિલલોકહૃદં સુહૃદમ્ ।
પ્રથિતાદ્ભુતશક્તિગણં સુગણં પ્રણમામિ રમાધિપતિં તમહમ્ ॥ ૮॥

સુખરાશિકરં ભવબન્ધહરં પરમાષ્ટકમેતદનન્યમતિઃ ।
પઠતીહ તુ યોઽનિશમેવ નરો લભતે ખલુ વિષ્ણુપદં સ પરમ્ ॥ ૯॥

ઇતિ શ્રીપરમહંસસ્વામિબ્રહ્માનન્દવિરચિતં શ્રીરમાપત્યષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by PSA EASWARAN

*ramApatyashtakam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*